# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

**कक्षा - शास्त्री-३, सेमेस्टर-५** **प्रश्नपत्रम् - ५** **गुणाः - ७०**
**विषयः - पुराणेतिहासः** **कोड - CC-3.5.9** **समयः - ११-०२**
**दिनाङ्कः - २९.११.२०१६** **ग्रन्थः - श्रीमद्भागवतमहापुराणे ( स्कन्ध-२,८ )**

---

### प्रथमान्वितिः ( युनिट - १ )

**प्रश्नः १ द्वयोः श्लोकयः ससन्दर्भप्रसङ्गं संस्कृते व्याख्या कार्या । ०८**

*(१) निद्रया ह्रियते नक्तं व्यवायेन च वा वयः ।*
*दिवा चार्थेहया राजन् कुटुम्बभरणेन वा ॥*

*(२) जितासनो जितश्वासो जितसङ्गो जितेन्द्रियः ।*
*स्थूलं भगवतो रूपे मनः सन्धारयेद्धिया ॥*

*(३) अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।*
*मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥*

**प्रश्नः २ सविस्तरेणोत्तरं लिखत ।( एकस्य ) ०८**

*(१) भगवतः विविधावताराणां कथा द्वितीयस्कन्धाधारेण लिखत ।*
*(२) भागवतस्य चतुःश्लोकी भागवतोपदेशं विवर्ण्य क्रममुक्तिसद्योमुक्तिवर्णनं विधीयताम् ।*

**प्रश्नः ३ द्वयोः टिप्पणी लिखत । ०४**

*(१) सृष्टिवर्णनम्* *(२) ध्यानविधिवर्णनम्*
*(३) विराट्स्वरूपवर्णनम्* *(४) परीक्षितः विविधाः प्रश्नाः*

**प्रश्नः ४ पञ्चानाम् लघूत्तराणि लिखत । ०५**

*(१) चतुःश्लोकी भागवतोपदेशं कः कस्मै ददाति ?*
*(२) नरनारायणावतारे कयोः गणना भवति ?*
*(३) विराट् पुरुषस्य पृष्ठभागात् कस्योत्पत्तिः जाता ?*
*(४) भगवद्भक्तेः प्राधान्यं किम् ?*
*(५) विद्या प्राप्त्यै कस्य देवस्योपासना कर्तव्या ?*
*(६) द्वितीयस्कन्धस्य नाम किम् ?*
*(७) श्रीशुकदेवेन कथारम्भः कस्माद् अध्यायात् क्रियते ?*

### द्वितीयान्वितिः ( युनिट - २ )

**प्रश्नः ५ द्वयोः व्याख्या ससन्दर्भप्रसङ्गं संस्कृते कार्या । ०८**

*(१) योगरन्धित कर्माणो हृदि योगविभाविते ।*
*योगिनो यं प्रपश्यन्ति योगेशं तं नतोऽस्म्यहम् ॥*

*(२) नमः शान्ताय घोराय मूढाय गुणधर्मणे ।*
*निर्विशेषाय साम्याय नमो ज्ञानधनाय च ॥*

(३) *तत्कथा सुमहत्पुण्यं धन्यं स्वस्त्ययनं शुभम् ।*
*यत्र यत्रोत्तमश्लोको भगवान् गीयते हरिः ॥*

**प्रश्नः ६ कस्याप्येकस्य सविस्तरेणोत्तरं लिखत ।** **०८**

(१) *पूर्वापरसन्दर्भसहितां समुद्रमन्थनकथां लिखत ।*

(२) *गजग्राहयोः युद्धं विवर्ण्य गजेन्द्रस्तुतिपूर्वकं गजेन्द्रमोक्ष कथां लिखत ।*

**प्रश्नः ७ टिप्पणीं लिखत ।( एकाम् )** **०२**

*(१) मन्वन्तराणि ।* *(२) मोहिनी-अवतारः ।*

**प्रश्नः ८ लघूत्तरं लिखत ।( द्वयोः )** **०२**

*(१) अष्टमस्कन्धस्य नाम किम् ?*
*(२) समुद्रमथनात् निर्गतस्य विषस्य नाम किम् ?*
*(३) गजग्राहयोः पूर्वावतारः कः ?*
*(४) समुद्रात् कति रत्नानि निर्गतानि ?*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ९ द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं संस्कृते व्याख्या कार्या ।** **०८**

(१) *धर्माय यशसेऽर्थाय कामाय स्वजनाय च ।*
*पञ्चधा विभजन्वित्तं इहामुत्र च मोदते ॥*

(२) *श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः ।*
*सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्म दक्षिणम् ॥*

(३) *गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि ।*
*यदि निर्यान्ति ते नूनं फेरुराजगृहोपमाः ॥*

**प्रश्नः १० कस्याप्येकस्य सविस्तरमुत्तरं लिखत ।** **०८**

(१) *वामनेन कृतां भूमियाचनां ततश्च बलेः बन्धनं वर्णयत ।*

(२) *पयोव्रतापदेशेन भगवत्प्राप्तिः ततश्च वामनावतार कथां पूर्वापरसन्दर्भेण लिखत ।*

**प्रश्नः ११ टिप्पणी लिखत ।( द्वयोः )** **०४**

*(१) वामनस्य विराट्रूपम् ।*
*(२) बलेः बन्धनान् मुक्तिः ।*
*(३) बलेः यज्ञशालायां वामनस्य प्राकट्यम् ।*
*(४) बलिना कृता भगवत्स्तुतिः ।*

**प्रश्नः १२ लघूत्तरं लिखत ।( पञ्चानाम् )** **०५**

*(१) बलेः पत्न्या पितुश्च नाम किम् ?*
*(२) 'वामनः' इति शब्दस्य कोऽर्थः ?*
*(३) वामनः कति पदपरिमितां भूमिमिच्छति ?*
*(४) पयोव्रतोपदेशं कः कस्मै ददाति ?*
*(५) बलिना मखः कस्याः नद्याः तटे कृतः ?*
*(६) बलेः साम्राज्यं कस्मिन् लोके ?*
*(७) बलेः गुरोर्नाम किम् ?*

=०=